सुवर्णव्यवहारोऽय तत्र शास्त्र प्रवर्तते ॥ इति ॥

No 4177. तर्कसङ्ग्रहदीपिकाव्याख्या.

TARKASANGRAHADĪPIKĀVYĀKHYĀ

Substance, palm-leaf Size, $16\frac{3}{4} \times 1\frac{1}{8}$ inches Pages, 84 Lines, 5 on a page Character, Telugu Condition, injured Appearance, old

Begins on fol 1*a*. The other work herein is Laksanāvalī 44*a*

Breaks off in Śabdakhanda

Another commentary on the Dīpikā of Annambhatta

Beginning

शुक्लाम्बरधरं . . . . . शान्तये ॥

नत्वा विघ्नेश्वरं देव . . . . . ।
. . . . . ॥

(अन्नम्भ)ट्टाख्य स विद्वान् प्रारिप्सितस्य ग्रन्थस्य अविघ्नेन प्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च कृतं विशिष्टेष्टदेवता . . . . . चिकीर्षित प्रतिजानीते—विघ्नेश्वरमिति। यद्यपि ईश्वरनमस्कारेणैव सर्वदेवता नमस्कृता तस्य सर्वात्मकत्वात् आत्मैव देवता . . . . . (ग्रन्था)दौ कर्तव्यतां सूचयति—गिरं गुरुमिति। शिशुहितामिति। मन्दप्रज्ञानामपि सम्यक् व्युत्पत्तिदायिनीमित्यर्थः।

End:

ननु शाब्दत्वं न जाति , साक्षात्त्वादिना साक(ङ्क)र्यात् । तथाहि — साक्षात्त्व विहाय शाब्दत्व ज्योतिष्टोमादिवाक्यजन्यप्रमायां वर्तते ; शाब्दत्वम्.

No 4178. तर्कसङ्ग्रहव्याख्या
TARKASANGRAHAVYĀKHYĀ

Pages, 63 Lines 7 on a page

Begins on fol 1a of the MS described under No 28
Pratyaksakhanda only complete
A commentary on the Tarkasangraha of Annambhatta
Author unknown

Beginning

निधाय हृदि . . . तर्कसङ्ग्रह ॥ इति ।

ग्रन्थारम्भे मङ्गलमाचरन्त्यभियुक्ता । तत्र य पुमान् ग्रन्थमारभते , तेन जन्मान्तरे दुष्कर्म कृत स्यात् , तेन च दुरितमुत्पन्न भवेत् , तच्च दुरितमेतस्मिन् जन्मनि एतत्पुरुषारम्भित(ब्ध)ग्रन्थसमाप्तिं प्रतिबध्नाति , प्रतिबन्धके सति किञ्चिदपि नोत्पद्यते ।

* * * *

अनन्तर विशेषधर्मप्रकारकजिज्ञासावन्त (न्त) पदार्थाः कियद्विशेषधर्मविशिष्टा इति पृच्छन्त शिष्य प्रति तदीयजिज्ञासाशान्तये आचार्यो ब्रूते—द्रव्यगुणेत्यादिना । सप्त पदार्था इत्यन्त विशेष्यवाचकम् , अभावा इत्यन्त विशेषणवाचकम् । सप्तेत्यस्य सप्तत्वसख्याविशिष्टविभाजकधर्मान्यतमविशिष्टा इत्यथ ।

End:

विशेषणविशेष्यभाव । भाव इत्यस्य धर्म इत्यर्थ , तथाच विशेषणवृत्तिधर्मं विशेषणत्व, विशेष्यवृत्तिधर्म विशेष्यत्वम् , तथाचाभावेन साक विशेषणत्वविशेष्यत्वान्यतर सन्निकर्ष .

No 4179. तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.

TARKASANGRAHAVYĀKHYA NYĀYABŌDHINI

Pages, 26. Lines, 7 on a page

Begins on fol 23*a* of the MS described under No 4116

An elementary work on Nyāya by Gōvaidhana-Sudhī, being a commentary on the Tarkasangraha of Annambhatta

Up to Śabdaparicchēda

See under the next number for the end

Beginning:

अखिलागमसञ्चारि श्रीकृष्णाख्य पर मह ।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मक मङ्गल शिष्यशिक्षायै ग्रन्थतो निबध्नाति – निधायेति । पदार्थान् विभजते द्रव्येति । अत्र सप्तग्रहण पदार्थत्व द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्याप्तिलाभाय ।

No 4180. तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.

TARKASANGRAHAVYĀKHYĀ NYĀYABŌDHINĪ

Substance, palm leaf Size, 14½ × 1⅝ inches Pages, 20 Lines, 6 on a page Character, Telugu Condition, injured Appearance, old

Begins on fol 1*a* The other work herein is Candrālōka 11*a*

Complete

Same work as the above

See under the previous number for the beginning

End:

अनेक इत्यनुपादाने नित्यत्वविशिष्टसमवेतत्वमात्रोक्तौ आकाशगतैकत्वपरिमाणादौ जलपरमाणुगतरूपादावतिव्याप्ति , जलपरमाणुरूपादे पृथिवीपरमाणुगतरूपादिवत् पाकाभावेन जलपरमाणुरूपादे आकाशगतै-

कत्वपरिमाणादे. नित्यत्वात् समवेतत्वाच्च । अतोऽनेकेति समवेतत्वविशेषणम् ॥

Colophon:

इति श्रीगोवर्धनभट्टाचार्यविरचितायां तर्कसङ्ग्रहव्याख्यायां न्यायबोधिन्यां शब्दपरिच्छेदस्समाप्त· ॥

No 4181. तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.

TARKASANGRAHAVYĀKHYĀ NYĀYABŌDHINĪ

Substance, palm-leaf Size, 16¾ × 1⅞ inches Pages, 17 Lines, 7 on a page Character, Grantha Condition, injured Appearance, new

Breaks off in Anumāna-paricchēda

Same work as the above

No 4182. तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.

TARKASANGRAHAVYĀKHYĀ NYĀYABŌDHINĪ

Pages, 25 Lines, 7 on a page

Begins on fol 8*a* of the MS described under No 4143

Pratyaksa incomplete

Same work as the above

No 4183. तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.

TARKASANGRAHAVYĀKHYĀ NYĀYABŌDHINĪ

Substance, palm-leaf Size, 15⅜ × 1⅝ inches Pages, 21 Lines, 6 on a page Character, Telugu Condition, injured Appearance, old

Pratyaksa incomplete

Same work as the above

No 4184. तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः.

TARKASANGRAHAVĀKYĀRTHANIRUKTIH.

Pages, 45 Lines 8 on a page

Begins on fol 15*a* of the MS described under No 1193

A brief commentary on Tarkasangraha by Pattabhirāma

Complete

Beginning :

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
तर्कसङ्ग्रहवाक्यार्थनिरुक्ति क्रियते मया ॥

इह खलु प्रारिप्सितप्रकरणपरिसमाप्तिप्रत्यर्थिप्रत्यूहविध्वंसनाय ग्रन्थारम्भे मङ्गलमनुतिष्ठन्ति शिष्टा'। प्रतिपित्सूना प्रतिपत्तये द्रव्यादिपदार्थान् प्रतिपिपादयिषुरन्नभट्टस्समनुमत मङ्गलमुपनिबध्नाति – निधायेति । ननु शिष्टसम्प्रदायादनुष्ठीयता नाम मङ्गलम्, तदुपनिबन्धन निरर्थकमिति चेन्न, उपनिबन्धनस्य शिष्यशिक्षार्थतामन्नम्भट्टो मनुते ।

End:

सर्वेषामेवेति । यथायथं यथायोग्यम् । अन्तर्भावादिति । अन्तर्भावप्रकारश्च दीपिकाया दर्शित., इह तु विस्तरभिया न लिख्यत इति सर्व समञ्जसम् ॥

अयुक्तमपि शास्त्रज्ञा यदुक्त पुनरुक्तिमत् ।
बालबोधनिमित्तार्थं क्षम्यतां तदशेषतः ।

Colophon:

निरुक्ति समाप्ता ॥

No 4185. तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः.

TARKASANGRAHAVĀKYĀRTHANIRUKTIH

Substance, palm-leaf Size, 16 × 1⅛ inches Pages, 60 Lines, 9 on a page Character, Grantha Condition, slightly injured Appearance, new

Pratyaksaparicchēda incomplete

Same work as the above.

No 4186. तर्कसङ्ग्रहपरिभाषा.

TARKASANGRAHAPARIBHĀSĀ

Pages, 27 Lines, 6 on a page

Begins on fol 1*a* of the MS described under No 1193

An elementary treatise on the conclusions of the Nyāya and Vaiśēsika systems by Pattābhirāma

Complete

Beginning.

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
बालव्युत्पत्तये तर्कसङ्ग्रहः क्रियते मया ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावास्सप्त पदार्थाः । तत्र द्रव्याणि—पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । तत्र भूः पृथिवी मृत्पाषाणघटपटादिरूपा परमाण्वादिमहापृथिवीपर्यन्ता । द्वाभ्यां परमाणु-(भ्यां)मिलिताभ्यामेक द्व्यणुकमुत्पद्यते, त्रिभिर्द्व्यणुकै त्र्यणुकम्, ततश्चतुरणुकादिक्रमेण महती पृथिवीत्युत्पद्यते ।

End:

तत्र पदज्ञान करण पदार्थोपस्थितिर्व्यापारः । उक्तानि प्रमाणानि चत्वारि ।

षट्टाभिरामविदुषा काणादन्यायगोचरा ।
बालानामवगाहाय परिभाषा स्फुटीकृता ॥

No 4187. तर्कसङ्ग्रहपरिभाषा.

TARKASANGRAHAPARIBHĀSĀ

Pages, 35 Lines, 6 on a page

Begins on fol 35*a* of the MS described under No. 4105

Complete

Same work as the above.

No 4188. तर्कसारः

TARKASĀRAH

Substance, palm-leaf Size, $17\frac{7}{8} \times 1\frac{1}{8}$ inches Pages, 270 Lines, 5 on a page Character, Telugu Condition, injured Appearance, old

The leaves are neither numbered nor arranged in proper order, consequently the extent of the work cannot be quite correctly determined

Breaks off in Śabdaparicchēda

A commentary on the Tarkabhāsāprakāsa of Cennubhatta by Kōmpella Vēnkatabudha

Beginning

आलिङ्गितादितनयाङ्गमनङ्गलीलामूलाङ्कुरायितलसत्पुलकप्रपञ्चम् ।
वेलातिगाश्रितकृपालतिकालवाल पाल्यान्महः किमपि न परदेवताख्यम् ॥
कोम्पेल्लवेङ्कटबुध प्रथितानुभावान्वाणीविनायकगुरून्प्रणिपत्य मूर्ध्ना ।
श्रीचन्नुभट्टकृतिभासुरतर्कभाषाभाव प्रकाशयति बालविबोधहेतो ॥
काक्षाङ्क्षिवर्त्म विदुषामपि दुर्विबोध काह बुधास्त्रिचतुराणि पदानि जानन् ।
कुर्वे तथापि सहसा ननु तर्कसार सन्तो हसन्त्वयमनुग्रह एव नूनम् ।

इह खलु धर्मार्थकाममोक्षाणा चतुर्णा मध्ये धर्मादीना त्रयाणा क्षयिष्णुत्वेन सातिशयत्वेन च हेयत्वान्मोक्षस्यैकस्योपादेयत्वात्तस्य च श्रवणमननिदिध्यासनोत्तरकालीनेतरभिन्नत्वप्रकारकात्मसाक्षा(त्का)रसाध्यत्वाद्वेदान्तवाक्यै श्रुतात्मस्वरूपस्य पुरुषस्य मननोपयोगितया आत्मतदितरपदार्थस्वरूपप्रतिपादिकामान्वीक्षिकी प्रणिनीषुर्भगवान् सूत्रकार प्रेक्षावता प्रवृत्तिसिद्धये विषयप्रयोजनादिसबन्धमादावसूत्रयत् — प्रमाणप्रमेयसंशय-
. . . . . तत्त्वज्ञानान्नि श्रेयसाधिगम – इति ।
तत्त्व ज्ञायते अनेनेति तत्त्वज्ञान शास्त्रम्, तस्मान्मोक्षप्राप्तिर्भवतीत्यर्थ· ।

End:

भेदान्वये तु भिन्नविभक्तिकपदसमभिव्याहाराभावात् निराकाङ्क्ष .
. . . . . सरूपाकाङ्क्षाया आत्मनिष्ठत्वेन अर्थेषु पदेषु

वा अभावेऽपि जिज्ञासायोग्यतावद्भेदकसमभिव्याहारविषयत्वावच्छिन्नत्वे रूपाकाङ्क्षाया पदेषु सत्त्वेन.

No 4189. तर्कसार..

TARKASĀRAH

Substance, palm-leaf Size, 15 × 1¼ inches Pages, 91 Lines, 4 on a page Character, Telugu Condition, good Appearance, new

Incomplete

Same work as the above

Beginning:

प्रमाणादिषोडशपदार्थतत्त्वज्ञानान्मोक्षप्राप्तिर्भवतीति न्यायपञ्चाध्याय्या प्रथमसूत्रेण श्रीमदक्षपादमहामुनिभिर्गौतमाचार्यैस्सिद्धान्तितम् । तादृशञ्च प्रमाणादिषोडशपदार्थतत्त्वज्ञानमुद्देशलक्षणपरीक्षादिक विना न सम्भवतीति तासामप्यवश्यकर्तव्यताया भाष्यकारै प्रतिपादितायामुद्देशादीना निरूपण क्रियते । तत्र वस्तुसङ्कीर्तनमुद्देश इति स्फुटत्वाल्लक्षणस्वरूपविचारः क्रियते । तत्रासाधारणधर्मो लक्षणमिति प्राचीना वदन्ति ।

End.

तथापि सस्कारपदं भावनाव्यतिरिक्तपरमित्येवरूपेण सयोगादीना समानासमानारम्भकत्वमूह्यम् । बुद्धिसुखदु खेच्छाद्वेषप्रयत्नभावनाशब्दाः

No 4190. तर्कसुधा.

TARKASUDHĀ

Pages, 61. Lines, 7 on a page

Begins on fol 11*a* of the MS described under No 4033

A treatise on certain questions bearing on Nyāya by Śrīsailasūri, a Pandit at the court of a Vīracikadēvēndra.

Incomplete

Beginning:

स्वैर हरे पुलकितोपवनभ्र(द्रु)माणि हर्षोदयस्तिमितवन्यविहङ्गमानि ।
अन्योन्यवैरविगमोत्सुकसर्वसत्त्वान्याकर्णयानि मुरलीकलशिञ्जितानि ॥

आलोलकुन्तलमरालकलापचूडमानर्तितभ्रुमुखरीकृतवशनालम् ।
वस्तु त्रिभङ्गललित मयि सन्निधत्ता व्यत्यस्तपादकमल व्रजभागधेयम् ॥

जयति श्रीबालधन्विकुल तदमल भुवि ।
कृपा निरुपधिर्यस्मिन् यतीन्दोर्नित्यमेधते ॥

तत्र रत्नाकर इव प्रादुरासीत्कलानिधिः ।
श्रीमान् सौम्यनृसिंहार्यस्सन्मार्गद्योतनोद्यत ॥

वेदान्तार्थविचारनिश्चितमतेस्तस्मादभूत्तत्कृपा-
भूमप्राप्तसमस्तशास्त्रहृदयः श्रीशैलसूरि. कृती ।
यो गोविन्दपदारविन्दयुगलीन्यस्ताखिलात्मस्थितिः
तत्कल्याणगुणानुभूत्युदितया तत्सेवया निर्वृत ॥

प्रौढेनाप्रतिमेन वीरचिकदेवेन्द्रेण बाल्यात्प्रभृ-
त्यैकान्त्यान्निजानिर्विशेषमनघां वृद्धि परा प्रापितः ।
सोऽय न्यायपयोनिधि निरवधि निर्मथ्य निष्पादिता
भक्तया तर्कसुधा समर्पयति तल्लेम्णा जुषध्व बुधा ॥

इह खलु—

प्रयोगहेतुभूतार्थतत्त्वज्ञानसमुद्भव. ।
शब्द प्रमाणमित्येतल्लक्षण लक्ष्यते मणौ ॥

तदर्थश्च प्रयुज्यत इति प्रयोगो वाक्यं तद्धेतुभूत यदर्थतत्त्वज्ञानं तज्ज-न्यत्वम् । तादृशश्च शब्दो लोके घटमानयेत्याद्यविसंवादि वाक्यम् ।

End

अतस्तात्पर्यादनुमानाविषयस्वसमानकालीनविषयसत्तावगाहिज्ञानजनक त्वादेव नानुवादकत्वम् । अत. शब्द स्वातन्त्र्येण प्रमाणमिति निरवद्यम् ॥

शौरे कौशिकतिरुमलदेशिकहृत्पद्मसद्मरसिकस्य ।
तर्कसुधाख्यानिबन्धे पूर्ण शब्दस्वतन्त्र(ता)वाद ॥
प्रौढेनाप्रतिमेन . . जुषध्व बुधा· ॥

Colophon

इति श्रीकौशिककुलतिलकश्रीशैलसूरिकृतिषु तर्कसुधाया शब्दखण्डे शब्दस्वातन्त्र्यवाद. सम्पूर्ण. ॥

No 4191. तर्कामृतम्.

TARKĀMRTAM

Pages 31 Lines 4 on a page

Begins on fol 21*a* of the MS described under No 4143
A treatise on Nyāya logic by Jagadīsa
Complete

Beginning

ब्रह्माद्या निखिलार्चिताखिदशसन्दोहास्सदाभीष्टदा
अज्ञानप्रशमाय यत्र मनसो वृत्तीस्समस्ता दधु· ।
श्रीविष्णोश्चरणाम्बुज भवभयध्वसैकबीज पर
हृत्पद्मे विनिधाय त निरुपम तर्कामृत तन्यते ॥

अथ रतिश्रियञ्च(श्रुतिश्श्रूयते)—आत्मा वारे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति । अस्यार्थ·—मुमुक्षुणा आत्मा द्रष्टव्य मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् । आत्मदर्शनोपाय क इत्यत आह श्रोतव्य इत्यादि । तेनार्थक्रमेण शाब्दक्रमस्त्यक्तो भवति; अग्निहोत्रं जुहोति यवागु(गू) पचतीत्यादिवत् । . . . . . .

पदार्थो द्विविधः—भावोऽभावश्चेति । तत्र भावषड्विध — द्रव्य-गुणकर्मसामान्यविशेष(समवाय)भेदात् । तत्र द्रव्यत्वगुणत्वकर्मत्वानि जातयः, सामान्यत्वादीनि तूपाधय ।

End

न कलञ्ज भक्षयेदित्यादौ बलवदनिष्टजनके लक्षणा । क्रियासङ्ग-तस्य एवकारस्य अत्यन्तायोगव्यवच्छेदोऽर्थः—यथा नील सरोज भवत्ये-वेति । विशेषणसङ्ग(त)स्यायोगव्यवच्छेद —यथा शङ्ख पाण्डर एवेति । विशेष्यसङ्गतस्यान्ययोगव्यवच्छेद —यथा पार्थिव एव धनुर्धर इति । एव दिशा सर्वत्र बोध्य ॥

Colophon

इति जगदीशविरचित तर्कामृत समाप्तिमगमत् ॥

No **4192** तर्कामृतम्.

TARKĀMRTAM

Pages, 4 Lines, 7 on a page

Begins on fol 31*a* of the MS described under No 3954

Contains Śabdakhanda

Same work as the above

No **4193.** तर्कामृतम्.

TARKĀMRTAM

Substance, palm-leaf Size, 15¾ × 1¼ inches Pages, 30 Lines, 6 on a page Character, Grantha Condition, slightly injured Appearance, new

Breaks off in the Śabdakhanda

Same work as the above

No 4194. तर्कामृततरङ्गिणी.

TARKĀMRTATARANGINĪ

Pages, 39 Lines, 9 on a page

Begins on fol 12*a* of the MS described under No 3954

A commentary on the Tarkāmrta of Jagadīsa

By Mukundabhatta

Complete

This manuscript is stated to have been transcribed by one Cakravarti Varāhācāryar

Beginning:

(शरणीकृत्य विश्वेशचरणौ त)न्यतेतराम् ।
बालानामवगाहाय तर्कामृततरङ्गिणी ॥

ब्रह्माद्या इति । तच्छ्रीविष्णो चरणाम्बुजमित्यन्वय । त्रिदशानां सन्दोहा. समूहा त्रिदशश्रेष्ठा इति यावत् । स . . . . य समस्ताः चाक्षुषस्पर्शनाद्या· मनसोऽन्तःकरणस्य वृत्तीः । चरणाम्बुजमित्यत्र हृत्पद्म इत्यत्र च उत्तरपदार्थप्रधानो न मयूरव्यसकादिसमासः ।

End:

अव्यवधानश्च प्रकृतवाक्यार्थघटकोपस्थितित्वावच्छेदेन प्रकृतान्वयबोधानुकूलोपस्थित्युत्पत्त्यनधिकरणत्वे सति तादृशोपस्थित्यधिकरणक्षणध्वसाधिकरणो य. क्षणः तद्ध्वंसाधिकरणक्षणानुत्पत्तिकत्वम् । गिरिज्ञानानीति बहुवचनन्तु व्यक्त्यभिप्रायेण ॥

Colophon:

इयं तर्कामृततरङ्गिणी सम्पूर्णा ॥

No 4195 तर्कामृतव्याख्यानम्—सुवर्णचषकम्

TARKĀMRTAVYĀKHYĀNAM SUVARNACASAKAM

Substance, palm-leaf Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches Pages, 9 Lines, 9 on a page Character, Telugu Condition, injured Appearance, old

Breaks off in Anumāna

A commentary on the Tarkāmrta of Jagadīsa by Gangarāmajat

Beginning:

आत्मरूपगुणकृत्यकारिणे लोचनाकलिततत्त्वसाक्षिणे ।
नूतनोद्भवसमाधिहेतवे नीलकण्ठगुरवे नमो नमः ॥

गुरुगणना यत्पूर्व यस्याग्रे स ग्रहाग्रणीतनय ।
कविमिव त कवयन्त तात नाराय(णं नौमि) ॥

(मुक्तावलीप्रकाशात्स्फुरिते चषके समर्पित सुधिया) ।
(गङ्गारामेण मया) पिबन्तु तर्कामृत सुधिय. ॥

यद्यप्यविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे विशेषत फलजिज्ञासाया दृष्टसम्भव विश्वजिन्न्यायानवताराद्रात्रिसत्रन्यायेन फलक ल्पनाप्रौढ्ये परिशेषानुमानप्रवृत्तस्य पुस प्रारब्ध कर्म निर्विघ्न परिस- (माप्यतामिति मङ्गले) प्रवृत्तपुरुषकामनाविषयत्वे समाप्तिरप्युपस्थिता, तथापि नास्तिकग्रन्थपरिसमाप्तौ अवश्यकृप्तनियतपूर्ववृत्तिताकेन स्वतस्सिद्ध- विघ्नात्यन्ताभावेनैव विघ्नस्थलीयसमाप्तेर्निर्वाहे न तत्र मङ्गलस्य हेतुत्वम्, अन्यथासिद्धत्वात् ।

For the end, see under the next number

No 4196. तर्कामृतव्याख्यानम्—सुवर्णचषकम्.

TARKĀMRTAVYĀKHYĀNAM SUVARNACASAKAM

Substance, palm-leaf Size, 14⅛ × 1¼ inches Pages, 70 Lines, 7 on a page Character, Grantha Condition, injured Appearance, old

Same work as the above

Anumānakhanda complete

For the beginning, see under the previous number

End

एतद्दोषरहित इति । सर्वेषामेव दोषाणां नित्यदोषत्वात् । शब्दो नित्य शब्दत्वादित्यत्र उक्तासाधारण्यस्य साध्यवदवृत्तित्वरूपस्य विरहादित्याशय । सद्धेतु प्रमाकरणमेव, अयोगोलक धूमवत् धूमादित्यादे सदोषस्य प्रमाकरणत्वेऽपि न क्षति । एतद्दोषरहित एव हेतुस्सद्धेतुः प्रमाकरणमिति व्याख्या दुर्व्याख्यैवेति मन्तव्यम् ॥

Colophon:

समाप्तः अनुमानखण्ड. ॥

No 4197. तार्किकरक्षाविवृति.

TĀRKIKARAKSĀVIVRTIH

Substance, palm-leaf Size, 13½ × 1¼ inches Pages, 175 Lines, 8 on a page Character, Grantha Condition, injured Appearance, old

A commentary on Varadarāja's Tārkikaraksa (a treatise based on the Nyaya and Vaisēsika systems) by Harihara of Bhāradvājagōtra

Breaks off in Gunadravyasambandha

Beginning:

अन्योन्यव्यस्तसामान्यसमावेशनिदर्शनम् ।
अव्याजभक्तिसुलभमव्याद्व्यमुख महः ॥

यदुपक्रमज्ञानि(नु)ष्मद्वर्गो यदुपज्ञमखिल आम्नायः ।
तेमजमनन्तमुपासे वृषाकपायीमनोरम देवम् ॥

ऐश्वर्येहावशैर्नित्य मनोवागादिभि सुरै ।
वन्दनीया भजे देवी स्वाभीष्टफलसिद्धये ॥

प्रकरणमुदित गौतममुनिमतमनुसृत्य वरदराजेन ।
विवृणोमि हरिहरोऽह भारद्वाजो नृसिहसूरिसुत ॥

इह खलु वरदराजो नाम कश्चिद्विपश्चित् अक्षपादपक्षिलादिभिरनेकधा लक्षणपरीक्षाभ्या प्रपञ्चितपदार्थजात बालिशानुजिघृक्षया कारिकानिबन्धेन तार्किकरक्षाख्यग्रन्थेन सङ्गृह्य तार्किकरक्षा स्वयमेव विवरीतुमारभमाण प्रारिप्सितस्य ग्रन्थस्य परिपन्थिप्रत्यूहविघाताय शिष्टाचारपरिप्राप्तमिष्टदेवतानमस्काररूप मङ्गलमादा निबध्नाति — प्रथमश्लोकेन नमामि परमात्मानमित्यादिना । परमात्मान नमामीति सबन्ध । परम उत्कृष्टश्चासौ आत्मा चेति कर्मधारये परमात्मशब्देन ईश्वर उच्यते ।

End.

तच्चानुगतरूपादि । तन्तुपटोत्पत्त्यनन्तर समवायिकारणाभावलक्षणप्रतिबन्धकापगमे सति अविलम्बेन कार्यजनकत्वमप्यस्त्येवेति न(नाति)व्याप्ति । ततश्चैकाश्रितकार्यं प्रति निमित्तत्वानधिकरणत्वे सत्यसमवायिकारणवृत्तिगुणत्वापरजातिमत्त्व(त्त्वम)समवायिकारणत्वम् । नवेत्यादि । असमवायिकारणत्वानधिकरणत्वे साति निमित्तकारणवृतिगुणत्वापरजातिमत्त्व निमित्तकारणत्वं नाम । सयोगेत्यादि । उष्णस्पर्श. पाकजे निमित्तम्

No 4198 तार्किकरक्षाविवृति.

TĀRKIKARAKSĀVIVRTIH

Substance, palm-leaf Size, $18\frac{1}{4} \times 1\frac{3}{4}$ inches Pages 42 Lines, 9 on a page Character, Kanarese Condition, good Appearance, new

Incomplete

Same work as the above

No 4199 तार्किकरक्षाव्याख्या.

TĀRKIKARAKSAVYĀKHYĀ

Pages, 64 Lines, 8 on a page

Begins on fol 36*a* of the MS described under No 1350

Contains the Anumāna portion, wants beginning and end

Another commentary on Varadarāja's Tārkikaraksā

Author unknown

Beginning:

तत्रान्यथा हेतुत्वादित्याह तथापि बाधेति । व्यभिचारज्ञानविरहतर्कयोरेव प्रयोजकत्वस्योक्तत्वान्नन्वित्यादिना तज्ज्ञानमादायाक्षेपोऽनुपपन्न इत्याशङ्क्याह . . तस्मात् स्थितमेतत्—स्वतस्सिद्धशङ्काविरहस्थले तर्कापेक्षा नास्त्येव, यत्रापि शङ्का तत्रापि व्याघातावधिरेवेति नानवस्थितेः(तिः) । केषाञ्चिदन्यथावस्थापरिहारमाह परे त्विति । न तर्कान्तरेति ।

End:

ननु स्वकीयाया शङ्काप्रतिबन्धकत्वेऽनवस्थाशङ्कापरिहारेऽपि व्याघातावधिराशङ्केत्याचार्यमत खण्डितमित्याशङ्क्य तस्यैवायमर्थकथनपरत्व . . . . . तत्र हीति । व्याघातावधिराशङ्केत्यत्र हीत्यर्थः । एवं स्यादित्यत्रैवं शब्दार्थमाह स्वकीयेति.

No 4200. न्यायकौस्तुभ.

NYĀYAKAUSTUBHAH

Substance, paper Size 11½ × 5 inches Pages, 488 Lines, 14 on a page Character, Telugu and Dēvanāgarī Condition, good Appearance, new

Complete To the end of Upamāna

A treatise on Nyāya logic by Mahādēva Panatāmakara, son of Mukundapandita

Beginning

दाक्षायणीरमणसच्चरणारविन्द ब्रह्मादिभिस्सुरवरैरपि सेव्यमानम् ।
श्रीगौतम मुनिवर मणिकारमुख्यान् आन्वीक्षिकीरतबुधाश्च नमामि भक्त्या ॥

मुकुन्द पितर नौमि षट्शास्त्रीतत्त्वदार्शिनम् ।
यत्पुण्यपरिपाकेन शास्त्रे गतिरभून्मम ॥

पुरुहूतपुरोहित सभाया कविताया किल कालिदासमन्यम् ।
निखिलाखिलशास्त्राविद्धुरीण शितिकण्ठाभिधसद्गुरु नमामि ॥

मोक्षहेतुप्रमाणादितत्त्वज्ञानाय सद्धियाम् ।
महादेवेन सुधिया क्रियते न्यायकौस्तुभ ॥

न्यायसिद्धान्त(नि)र्कर्षे जिज्ञासा यस्य विद्यते ।
सद्भाष्यस्तेन सुधिया न्यायकौस्तुभ आदरात् ॥

न्यायाम्भोधि समुन्मथ्य भावनामन्दराद्रिणा ।
विष्णुनेव महादेवेनाय कौस्तुभ उद्धृ(द्धृ)त ॥

इह सकलशिष्टाना ग्रन्थारम्भे मङ्गलाचरणात् मङ्गलफलमादौ विचार्यते । तत्र प्राचीनानुयायिनः—

मङ्गल (न) समाप्ति(फल)कम्, तस्य चाशुविनाशितया समाप्तचव्यवहितपूर्वक्षणे असत्त्वेन हेतुत्वमनुपपन्नमिति विघ्नध्वसो व्यापार., तथा च समाप्तित्वावच्छिन्न प्रति विघ्नध्वसद्वारा मङ्गल हेतुरिति पर्य्यवसन्नम् ॥

End.

सप्रतियोगिकत्व ससम्बन्धिकत्वम्, तेन सबन्धान्तराणामपि सङ्ग्रह इत्यल पल्लवेन ॥

सक्षेपेणैवोपमान ग्रन्थकृद्भिर्निरूपितम् ।
अत· किञ्चिद्विस्तरेण मया तद्धि निरूपितम् ॥

Colophon ·

इति श्रीमन्मुकुन्दपण्डितात्मजपणतामकरोपनामकमहादेवपण्डित(विर)चिते न्यायकौस्तुभे उपमानकौस्तुभस्सम्पूर्ण ॥

No 4201 न्यायचूडामणि.

NYAYACŪDĀMANIH

Substance, palm-leaf Size, 15⅞ × 1½ inches Pages, 191 Lines, 10 on a page Character, Telugu Condition good Appearance, new

Prāmānyavāda complete

A work on Nyāya logic by Rāmakrsnādhvarin, son of Dharmarājādhvarīndra

Beginning

ननु प्रमाणतत्त्वमत्र विविच्यत इत्यनेनैव प्रेक्षावत्प्रतिपित्सितार्थप्रतिज्ञासिद्धेः शेषवैयर्थ्यम् । न चान्वीक्षिकीप्रयोजनमोक्ष . . . .

. . कदेशप्रमाणतत्त्वनिरूपकस्वग्रन्थस्यापि तत्प्रयोजनसिद्धेर्न वैयर्थ्यमिति वाच्यम्, यतो मणेरित्यादिनैव स्वग्रन्थप्रयोजनस्योक्तत्वादित्याशङ्क्य प्रेक्षावत आस्तिकस्यैहिकप्रयोजनमात्रेण गहनक्लेशात्मकग्रन्थे प्रवृत्त्यनुपपत्ते· ।

End:

तथा सति समूहालम्बने विशेषणताविशेष्यकत्ववर्णनवैयर्थ्यादित्याशङ्क्य विशिष्टबुद्धौ तस्याः प्रकारकत्वा . . . . . न प्रकारशब्दस्य विषयपरत्वाभावात् तच्छब्देनापि तथैव परामर्शादित्याशयेनाह—तथाचेति ॥

Colophon:

इति श्रीधर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते न्यायचूडामणौ प्रामाण्यवादस्समाप्त ॥

No **4202** न्यायपारिजातः

NYĀYAPĀRIJĀTAH

Substance, palm-leaf Size, 15½ × 1⅝ inches Pages, 160 Lines, 8 on a page Character Telugu Condition, injured Appearance, old

Wants beginning and end in Śabdakhanda

Incomplete

A treatise on Nyāya logic by Yallavārya

Beginning:

द्वितीयकल्पेऽपि किं प्रतिपाद्येच्छाविषयत्वमुत प्रतिपादकेच्छाविषयत्वमिति विकल्प्यान्त्ये प्रतिपादकस्य बुभुक्षाकाले प्रयुक्तघटमानयेति वाक्यस्य भोजनादिपरत्वापत्तेरित्यभिप्रेत्याद्यमनूद्य प्रत्याह—मणिकारो नापीति । तत्रेच्छाविषयत्वमात्र विवक्षितमुत समभिव्याहृतपदार्थसाध्यत्वमपि इच्छाविशेषणमपि(मिति) विकल्प्याद्य प्रत्याह—मणिकारो यस्येति ।

* * * *

Colophon.

इति श्रीयल्लयार्यविरचिते न्यायपारिजाते तात्पर्यवादस्समाप्त· ॥

दशदाडिमादिवाक्यवदसाङ्गत्यपरिहारायाह—प्रसङ्गादिति । तत्प्रतीति-

प्रयोजकत्वरूपतात्पर्यज्ञानकाले प्रतीतिप्रयोजकत्व . . . मावृत्त्या वा तया विनापीत्येवं तस्योपस्थितत्वादिति भावः ।

End.

इष्टापत्तिशङ्का निराकरोति मणिकारः सिद्धौ तदन्यस्य वाक्येन प्रवृत्तिप्रसङ्गमिति । जीवनस्य सिद्धत्वेन द्वारत्वात्.

No 4203. न्यायप्रकाशिका.

NYĀYAPRAKĀŚIKĀ

Substance, palm-leaf Size, 15¼ × 1¼ inches Pages, 162 Lines 6 on a page Character, Grantha Condition, injured Appearance, old

Breaks off in Anumāna

A commentary on the Tarkabhāsāprakāsikā of Cennubhatta by Naraharimisra

Beginning.

प्रतिनृपतिशिरोभिस्सार्धमर्धेन्दुमौलेर्नमयति पणचाप राघवे लाघवेन ।
विदितम(द)नतन्त्रो मूलमन्त्रो रताना जयति जनकजाया लालसो द्दग्विलासः ॥

तत्रेति । नान्वयव्यतिरेकसहचारज्ञानसहकृताध्यक्षगम्येत्यर्थो कारणताशरीरप्रविष्टान्वयव्याप्तिरेव, न तत्र व्यतिरेकसहचारज्ञान कारणम्, मानाभावात् । न च व्यतिरेकेण सहचारेणान्वयव्याप्तिर्गृह्यत इति नास्याभिधानमिति वाच्यम्, तथाप्यन्यतरोपादानव्यर्थतापत्तेः ।

End

न च तत्स्वरसाद्व्यापकत्वमर्थोऽस्त्विति वाच्यम्, तथा सति तावन्मात्रस्यैव गमकतासामर्थ्ये शेषवैयर्थ्यापत्तेः । प्रथमानुमाने साधनवैकल्यं दृष्टान्ते पक्षे हेत्वसिद्धिश्च स्यात् । महत्त्वस्य द्रव्यत्वाव्यापकत्वात् । एवमदृष्ट.

No 4204. न्यायरत्नटीका—द्युतिमालिका.

NYĀYARATNATĪKĀ DYUTIMĀLIKĀ

Substance, palm-leaf Size, 16¾ × 1¼ inches Pages, 166 Lines, 5 on a page Character, Nandināgarī Condition, injured Appearance, old

A commentary on Manikantha's Nyāyaratna by Nrsimhayajvan, son of Mankālānnam Sōmayājin

Complete

Beginning

श्रीपतिर्निजभक्ताना रक्षणे दत्तमानस ।
व्यापक नित्य विश्वमातरमम्बिकाम् ॥

. . . . . ।
न्यायरत्नस्य टीकेय विशद्द्युतिमालिका ॥

* * * *

न तथा चाय तस्मान्न तथेति—इत्यनुमानं न्यायस्स एव रत्नमिति ग्रन्थनाम कथितम् । द्वितीयपक्षे क्षित्यादिक सकर्तृक कार्यत्वाद्यदेव तदेवं यथा घट· तथा चेद तस्मात्तथेति—इत्यनुमानं न्यायः ।

* * * *

वस्तुतस्तु सशयप्रयोजनादयस्तु अवयवसामान्यलक्षणाक्रान्तत्वाभावादेव नावयवा·, किन्तु न्यायाङ्गत्वेनोपयुज्यन्त इति नाधिक्यमिति भाव· । उपसहरति — अत इति । यत अज्ञाताना तेषामुपयोगः अत इत्यर्थ ॥

Colophon

इति श्रीमदहोबिलनृसिंहस्वामिकरुणाकटाक्षवीक्षितसकलशास्त्रार्थनिर्णयसमर्थश्रीमन्मङ्कालान्नंसोमयाजिसूनुना नृसिंहयज्वना विरचितायां न्यायरत्नटीकाया द्युतिमालिकायामवयवनिरूपणम् ॥

End·

अस्यापि प्रतिपक्षानुमानमाह पूर्ववादी अयमिति । वह्निमत्त्वाश्रय इत्युक्ते सिद्धसाधनता, तदर्थमेतत्पर्वतातिरिक्तेति । एतत्पर्वतातिरिक्तत्वे सति वह्निमत्त्वाश्रय इति पूर्वपक्षानुमान भवत्येवेति भाव । एवमुत्तरत्रापि द्रष्टव्यम् । स्वनामधेयपुरस्सर स्वकृतग्रन्थस्योपयोगमाह–इति श्रीमणिकण्ठेनेति । ग्रन्थकर्तृनामधेय दर्शितम् । न्यायशास्त्रकर्तारमक्षपादमुनि नत्वा महीकरोति यद्विवेचनेति ॥

Colophon.

विवेश पूर्णता सम्यक् विशदा द्युतिमालिका ।
तार्क्ष्याचलेशमन्त्रस्य चिन्तनात् प्रत्यह मुदा ॥

No **4205.** न्यायशास्त्रार्थदीप.

NYĀYAŚĀŚTRĀRTHADĪPAH

Substance, palm-leaf Size, 16 × 1¾ inches Pages, 140 Lines, 8 on a page Character Grantha Condition, slightly injured Appearance, old

Begins on fol 1*a* The other work herein is Nyāyaśāstrārthadīpavyākhyā 71*a*

A work on Nyāya logic by Śasadhara The work is often called Śaśadharīya after the name of the author

Complete

Beginning

ध्वंसितपरसिद्धान्तध्वान्त गौतममतैकसिद्धान्तम् ।
नत्वा नित्यमधीशं शशधरव(श)र्मा प्रकाशयति ॥

न्यायशास्त्रार्थदीपोऽय कथासु विजिगीषुभिः ।
दा(धा)रणीयः प्रयत्नेन (सत्तर्क)स्नेहपूरित ॥

इह तावदभीष्टकर्मणो निर्विघ्नपरिसमाप्तिमुद्दिश्य बहुशः प्रवर्तमाना विनाकायाच्च(ग्रकार्च)नतिथि(दधि)दूर्वादौ मङ्गले दृश्यन्ते प्रेक्षावन्त । तत्र (मङ्गलस्य)वा तद्विशेषस्य नमस्कारस्य वा दुरितादुत्सारणद्वारा अभीष्टसमाप्ति प्रति कथमुपायत्व ग्राह्यम् श्रुतेरिति चेन्न, तथाविधश्रुतेरनाकलनात् । शिष्टाचारात्तदनुमानामिति चेन्न, शिष्टाचारस्य(।)निर्वचनात् । तथा हि—

किमिद शिष्टाचारत्वम्? वेदप्रामाण्याभ्युपगन्त्रि(न्तृ)पुरुषोत्पाद्यमानत्व वा, उद्देश्यविशेषितमेतदेव वा, एवम्भूतपुरुषेण वेदमूलकतया स्वीक्रियमाणत्व वा, वेदमूलकतया प्रतीयमानत्व वा, वेदोपदिष्टहेतुफलभावक्रियात्वमेव वा, अन्यद्वा? नाद्य.—तथाविधपुरुषक्रियमाणस्य जलताडनस्य शिष्टाचारत्वप्रसङ्गात् । तथा च तेनापि वेदानुमान स्यात् ।

End

ससर्गाभावे तु यत्र प्रतियोगिविरहप्रयुक्त प्रतियोग्यनुपलम्भ, तत्र योग्यप्रतियोगिकोऽपि गृह्यते । अत एव वायौ रूपाभावग्रहे शब्दाभावश्च प्रत्यक्ष । मनसि तु न रूपविरहयुक्तो रूपानुलम्भ इति नासौ तत्र योग्यमन एव सर्वत्र तन्त्रमित्याहुरिति सर्व सुन्दरमिति संक्षेप ॥

No 4206. न्यायशास्त्रार्थदीपः.

NYĀYAŚĀSTRĀRTHADĪPAH

Substance, palm-leaf (Śrītāla) Size, 17⅜ × 2¼ inches Pages, 92 Lines, 10 on a page Character, Telugu Condition, good. Appearance, old

To the end of Vyāptivāda

Same work as the above

No 4207. न्यायशास्त्रार्थदीपः.

NYĀYAŚĀSTRARTHADĪPAH

Pages, 32 Lines, 5 on a page

Begins on fol 13*a* of the MS described under No 4117
Breaks off in Śaktivāda
It is also called Nyāyasiddhāntadīpa
Same work as the above

No 4208. न्यायशास्त्रार्थदीपव्याख्या.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ

Substance, palm-leaf (Śrītāla) Size 17½ × 2½ inches Pages 74 Lines, 10 on a page Character, Nandināgarī Condition, good Appearance, old

This is a commentary on the Nyāyasāstrārthadīpa of Śasadhara by Bhisagrāt It is also called Prabhā

Contains Maugalavāda Andhakāravāda, Kāranatāvāda, Sahaja-śaktivāda, Manōnutvavāda and Mōksavāda

Incomplete

Beginning

कल्याणाचलकोदण्ड कमलाकान्तसायकम् ।
कल्लोलमालितूणीर कलये पुरशासनम् ॥

सङ्केत प्राप्य राधारहितमथ हरिश्शङ्कयागत्य दृष्ट्वा
तच्च(च्छ्व)श्रू द्वारि वृद्धा निकटगृहवधूवेषधारी सशङ्काम् ।
तां तत्सीत्कारभाषागतिहसितमुखैर्वञ्चयन्नेत्य गेहं
राधामालिङ्गच गाढं रतिमुदितमनाश्श्रेयसे भूयसेऽस्तु ॥

अवलम्बे कृपालम्बामम्बां शैलोन्नतस्तनीम् ।
लम्बोदरं च सस्कन्द कम्बुकुन्देन्दुसन्निभम् ॥

स्वपक्षरक्षापरिपन्थिकक्ष्याशिक्षाप्रगल्भोक्तिभरो भिषग्राट् ।
व्याख्यां विशेषेक्षितपक्षिलाक्षपादप्रबन्ध. कुरुते प्रभाख्याम् ॥

प्रारी(रि)प्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं शिष्टाचारविशिष्टदेवतानमस्कारं कृतं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षित प्रतिजानीते—ध्वसितेति । अत्र नित्यमधीश नत्वेति नमस्कारनिबन्धः ।

* * * *

ग्रन्थगौरवभिया दिङ्मात्रमत्र प्रदर्श्यते । परिहारस्तूक्त एव । कामनाया प्रारिप्सितत्वप्रवेशस्तु विषयमाहात्म्यान्नातिरिच्यक(त) एवेति ।

अन्धकारवादप्रारम्भः—

एव तावत् स्वकृ(की)र्त्यमङ्गलस्य साफल्य प्रसाध्य प्रतिज्ञात गौतमसिद्धान्त प्रदर्शयन् प्रथममन्धकारस्याभावत्व प्रसाद(ध)यितु विवादाङ्गसशयविप्रतिपत्ति दर्शयति – अन्धकार इति ॥

* * * *

बादरायणवश्येन भिषग्राजविपश्चिता ।
हेतुश्शशधरग्रन्थे व्याकृतोऽय यथामति ॥

End.

मोक्षवाद --

अपवर्गस्वरूप निरूपयिष्यन् तस्य शास्त्रेऽवश्यनिरूप्यत्वमाह—अपवर्ग इति । आन्वीक्षिकीप्रयोजनत्वेनेति । आन्वीक्षिकी तर्कशास्त्रम् । न चात्र प्रमाणाभाव , आत्मा वारे द्रष्टव्य इति श्रुत्या आत्ममननस्यापवर्गहेतुत्व प्रतिपाद्यते, मननञ्च युक्तिभिरनुचिन्तनम्, तथा च मननरूपभेदानुमितौ आत्मन प्रतियोग्युपस्थापकत्वेनान्यथा वा शास्त्रस्योपयोगात् श्रुतिसिद्धमेव तदपवर्गकारणत्वमिति महर्षिणा प्रतिपादितम् । आद्यसूत्रेणेति शेषः । तथा च सोऽवश्य निरूप्यत इति भावः ।

* * * *

तस्य स्वतस्सिद्धत्वात् शास्त्रवैयर्थ्यमित्यत उक्तमभिव्यक्तीति । जीवस्येति । अस्यार्थ(:).

No 4209 न्यायशास्त्रार्थदीपव्याख्या.

NYĀYASĀSTRARTHADĪPAVYĀKHYĀ

Pages, 28 Lines, 8 on a page

Begins on fol 71*a* of the MS described under No 4205

Breaks off in Tamōvāda

Same work as the above

No 4210. न्यायशास्त्रार्थदीपव्याख्या.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ

Substance, palm-leaf Size, 17$\frac{3}{4}$ × 1$\frac{1}{4}$ inches Pages, 58 Lines, on a page Character, Telugu Condition, much injured Appearance, old

Incomplete

Same work as the above

No 4211 न्यायशास्त्रार्थदीपव्याख्या.

NYĀYAŚASTRĀRTHADĪPAVYĀKHYĀ

Substance, palm-leaf Size, 15$\frac{3}{4}$ × 1$\frac{3}{4}$ inches Pages, 11 Lines 7 on a page Character, Nandināgarī Condition, fair Appearance, old

Begins on fol 6*a* The other work herein is Raghuvamsa 8th Sarga 1*a*

Incomplete

Same work as the above

No 4212. न्यायसङ्ग्रह.

NYĀYASANGRAHAII

Substance, palm-leaf Size, 17$\frac{7}{8}$ × 1$\frac{1}{2}$ inches Pages, 5 Lines, 9 on a page Character, Grantha Condition, injured Appearance, old

Begins on fol 44*a* The other works herein are Kuravañjiprabandha 1*a*, Pañcasamskāravidhāna 18*a*, Ambujavallīparinaya

(nātaka) 19*a*, Ambujavallīdandaka 42*a*, Nyāyasangrahadīpikā 47*a* Varāhastōtra 89*a*, Varāhavijayakāvya 90*a*

Complete

By Śrīnivasa of Śrīmusna

This is a short treatise on Nyāya logic intended for the use of bigmners

Beginning

नमस्कृत्य जगन्नाथ न्यायसङ्ग्रह उच्यते ।
पदार्थो द्विविध· प्रोक्तो भावाभावप्रभेदत ॥
तत्र भावो द्रव्यगुणकर्मसामान्यरूपत ।
विशेषस्समवायश्चेत्यपि षड्विध ईरितः ॥

End

एतेषां तत्त्वविज्ञान साक्षान्मोक्षस्य कारणम् ।
मोक्षत्व तत्त्वधीजात्मसर्वदुःखविनाशता ॥

Colophon

इति श्रीमुष्णनगरश्रीनिवासविपश्चिता ।
बालानामुपकाराय कृतोऽय न्यायसङ्ग्रहः ॥

No 4213 न्यायसङ्ग्रहदीपिका,

NYĀYASANGRAHADĪPIKĀ

Pages, 83 Lines, 9 on a page

Begins on fol 47*a* of the MS described under No 4212

Complete

A commentary on the Nyāyasangraha of Śrīnivāsa Śrīnivāsabudha, son of Śrīmadvīravallīvaradanārāyanaguru Kaundinyagōtra

Beginning ·

विविधसकललोकत्रातजन्मादिहेतुं
निरवधिभवरूपापायवाराशिसेतुम् ।

निखिलनिगममूल निर्मलानन्दबोधं
श्रितदुरितविदार श्रीवराह नमामि ॥

इह खलु श्रीमुष्णनगरनिवास श्रीनिवासाख्यो विपश्चित् निजबालकानुग्र(ह)धिया कारिकाशतेन न्यायसङ्ग्रह कर्तुकामो निर्विघ्नमेव स्वाभीष्टपरिपूरणाय कृत मङ्गलमुपदिशन्नेव प्रारिप्सित प्रतिज्ञाय सामान्यत पदार्थमुद्दिश्य विभजते—

नमस्कृत्य . . . प्रभेदत ॥ इति ।

अत्र मङ्गल नाम नमस्काराद्यन्यतमम् । तच्च अलौकिकाविगीतशिष्टाचारानुमितश्रुतिबोधितारब्धसमाप्तिरूपेष्टसाधनताकमित्यादौ कृतम् ।

End:

इदानी स्वग्रन्थपरिपूर्ति द्योतयन् स्वनामप्रकटनपुरस्सरमेतत्प्रकरणस्य सफलतामाह -

इति श्रीमुष्णनगर . . , न्यायसङ्ग्रह ॥

अर्थस्तु स्पष्ट एव ॥

Colophon

इति श्रीमुष्णनगरनिवासिकौण्डिन्यकुलतिलकायमानश्रीमद्वीरवल्लीवरदनारायणगुरुवरतनयश्रीनिवासविबुधविरचितेय न्यायसङ्ग्रहदीपिका सम्पूर्णा ॥

No 4214 न्यायसिद्धान्तदीपप्रकाश --न्यायरत्नम्.

NYĀYASIDDHĀNTADĪPAPRAKĀŚAH NYĀYARATNAM

Substance, palm-leaf Size, 13¼ × 1½ inches Pages, 148 Lines, 8 on a page Character, Grantha Condition, injured Appearance, not recent

Begins on fol 1*a* The other work herein is Yōgarūdhi 75*a* To the end of Nirvikalpakavāda

A commentary on Śasadhara's Nyāyasāstrārthadīpa by Dharmarājādhvarīndra of Kaundinya-gōtra

Beginning

वटविटपिसमीपे बोधमुद्रा दधानो जयति जगति भूमा कोऽपि सोमावतसः।
विगतकलुषजाले भक्तचित्तालवाले सुदृढमिव निधित्सुश्चिन्मयान्यङ्कुराणि ॥

अध्यासीनोऽग्रहार मखिकुलमहित कण्डूमाणिक्कसज्ञ
व्याकुर्वन् यः प्रकाश समतनुत मणे पङ्क्तिटीकाविभागम्।
सोऽय कौण्डिन्यगोत्रः शशधरकलितन्यायसिद्धान्तदीप
गम्भीर युक्तिजालैर्विशदयति तथा धर्मराजो बुधेन्द्रः ॥

भवन्ति दूषणानीह पूर्वटीकासु यद्यपि।
तथापि न विलिख्यन्ते ग्रन्थगौरवभीतित ॥

निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरन् चिकीर्षित प्रतिजानीते—ध्वसितेति। परेषा मीमांसकाना सिद्धान्तरूपान्धकारो ध्वंसितो येनेति क्रियाविशेषणम्। गौतमेनाङ्गीकृतो यो मुख्यसिद्धान्त तम्। स्वकीर्त्यनुवृत्त्यर्थं स्वनाम दर्शयति—शशधरेति। प्रकाशयति सम्यक् प्रतिपादयतीत्यर्थः।

End:

न च वह्निमानित्यादिव्यक्तिसाध्यकानुमितौ पक्षीयसाध्यस्य प्रागनवगमेन तद्विशिष्टानुमितौ व्यभिचार, सामान्यप्रत्यासत्त्या सर्वोपसहारेण व्याप्तिग्रहवेळायां पक्षीयसाध्यव्यक्तेरप्यनवगतत्वेन दोषाभावात्। तदेतदाह—इति संक्षेप इति.

Colophon:

इति धर्मराजविरचिते न्यायरत्ने निर्विकल्पकवादः ॥

No 4215. न्यायसिद्धान्तमञ्जरी.

NYĀYASIDDHĀNTAMAÑJARĪ

Substance, paper Size, $10\frac{1}{2} \times 4\frac{5}{8}$ inches Pages, 85 Lines, 9 on a page Character, Telugu Condition, good Appearance, old

Begins on fol 1*a* The other work herein is Śrīkanthīya 44*b*

Complete

A work on Nyāya logic by Jānakīnātha otherwise called Cūḍāmanibhattācārya

Beginning

प्रणम्य परमात्मान जानकीनाथशर्मणा ।
क्रियते युक्तिमुक्ताभि न्यायसिद्धान्तमञ्जरी ॥

इह खलु निखिललोकविमोक्षमुख्योपाय मननोपायमात्मनस्तत्त्वज्ञानमामनन्ति । तंच्च प्रमाणाधीनमिति प्रमाण निरूप्यते । तत्र प्रमाया करण प्रमाणम्, प्रमा च यथार्थानुभवः । तदाहुराचार्या'—यथार्थानुभवो मानमिति । ननु किमिद याथार्थ्यम्? किमिदमनुभवत्वम्? उच्यते—तद्वति तदवगाहित्व याथार्थ्यम् । भवति हि रजते इद रजतमिति ज्ञान तद्वति तदवगाहीति यथार्थम् ।

End:

अथ रजतत्वेन्द्रियसन्निकर्षविरहात(त् क)थ तत्प्रकारकमिति चेत्न—सन्निहितं रजत यत्र तत्र तत्सयुक्तसमवायस्य अन्यत्र ज्ञानसन्निकर्षस्य सत्त्वात् । ज्ञानस्य सन्निकर्षत्वे कि मानमिति चेद्रजतत्वप्रकारकमेवेत्यवेहि । तत्रैव कि मानमिति चेत्तत्प्रकारकप्रवृत्तिरिति सक्षेप' ॥

Colophon

इति श्रीचूडामणिभट्टाचार्यरचिता न्यायसिद्धान्तमञ्जरी समाप्ता ॥

No 4216 न्यायसिद्धान्तमञ्जरी.
YĀYASIDDHĀNTAMAÑJARĪ

Substance, palm-leaf Size, 14 × 1¼ inches Pages, 53 Lines, 6 on a page Character, Grantha Condition, good Appearance, old

Pratyaksakhanda complete Anumānakhanda incomplete

Same work as the above

No 4217 न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARĪ

Substance, paper Size, 10½ × 4⅝ inches Pages, 31 Lines, 18 on a page Character, Telugu Condition, good Appearance, old

Begins on fol 1*a* The other work herein is Nyāyasiddhāntamañjarīvyākhyā (Tarkaprakāsikā) 17*b*

Complete

Same work as the above

No 4218. न्यायसिद्धान्तमञ्जरी
NYĀYASIDDHANTAMAÑJARI

Substance, palm-leaf Size, 13⅝ × 1⅝ inches Pages, 44 Lines, 6 on a page Character, Telugu Condition, injured Appearance, old

Incomplete

Same work as the above

No 4219. न्यायसिद्धान्तमञ्जरी.
NYAYASIDDHANTAMAÑJARĪ

Substance, palm-leaf Size, 17⅞ × 1¼ inches Pages, 36 Lines, 8 on a page Character, Grantha Condition, slightly injured Appearance, old

Begins on fol 124*a* The other work herein is Śrīkanthīya 1*a*

From Śabdakhanda to the end

Complete

Same work as the above.

No 4220. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARĪ

Substance, palm-leaf Size 20¼ × 1⅝ inches Pages, 36 Lines, 8 on a page Character, Telugu Condition, slightly injured Appearance, old

Begins on fol 1*a* The other work herein is Nyāyasiddhāntamañjarīdīpikā (Tarkaprakāśikā) 19*a*

Complete

Same work as the above

No 4221 न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARI

Pages, 68 Lines, 6 on a page

Begins on fol 1*a* of the MS described under No 4105

Breaks off in the Śabdakhanda

Same work as the above

No 4222 न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARI

Pages, 17 Lines, 10 on a page

Begins on fol 1*a* of the MS described under No 1388.

Anumānakhanda incomplete

Same work as the above

No 4223. न्यायसिद्धान्तमञ्जरीदीपिका--तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ TARKAPRAKĀŚIKĀ

Pages, 256 Lines 8 on a page

Begins on fol 19*a* of the MS described under No 4220

A commentary on the Nyāyasiddhāntamañjarī of Jānakīnātha by Śrīkantha

Complete

Beginning :

ससर्गाभावश्चान्योन्याभावश्च नञर्थः । तत्रान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्व व्युत्पत्तिबलसिद्धम्, नीलघटवति न घट, नीलघटो न घट इत्यव्यवहारात्, इह पीतघटवति न नीलघट., पीतघटो न नीलघट इति व्यवहाराच्च । प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ । तेन यत्पदोपस्थापितस्य प्रतियोगिनोऽनुयोगिन्याधाराधेयभावसम्बन्धेनान्वय, तत्र ससर्गाभावस्यापि तथा । यथा—पचति चैत्र, न पचति चैत्रः, चैत्रस्येद, नेदं चैत्रस्य—इत्यादि ।

End :

अन्योन्याभावबोधने नञो न सामर्थ्यम् । तेन न पचति, न राज्ञ इत्यादौ कृत्यादेरन्योन्याभावः, भूतल(ले) न घट इत्यादौ घटादेस्ससर्गाभावो न प्रतीयत इत्याहु ॥

Colophon :

इति श्रीमद्विद्वत्कुलतिलकश्रीमदद्वैतविद्याचार्यश्रीमच्छिरोमणिभट्टाचार्यप्रणीतश्रीमत्समस्तपण्डितकुलतिलकश्लाघनीययुक्तिमुक्ताफलगुम्फितो नञ्शिरोमणि ॥

No 4253 नञ्वादशिरोमणि (नञ्विवेकः).

NAÑVĀDAŚIRŌMANIH (NAÑVIVĒKAH)

Pages, 6 Lines, 6 on a page

Begins on fol 5*a* of the MS described under No 3916

Same work as the above with a difference in the colophon only

Colophon .

श्रीतार्किकशिरोमणिभट्टाचार्यकृतौ नञ्विवेकस्समाप्त· ॥

No 4254. नञ्वादशिरोमणिव्याख्यानम्—नञ्विवेचनम्.

NAÑVĀDAŚIRŌMANIVYĀKHYĀNAM
NAÑVIVĒCANAM

Pages, 46 Lines, 7 on a page

Begins on fol 70 of the MS described under No 4252

A commentary on the Nañvāda of Śirōmani-bhattācārya

By Raghudēva-Nyāyālankāra

Incomplete

Beginning :

शिवं प्रणम्य तत्पश्चात् तर्कवागीश्वर गुरुम् ।
क्रियते रघुदेवेन नञ्वादे सुविवेचनम् ॥

प्रसङ्गसङ्गत्या नञ्शक्यतावच्छेदक व्यवस्थापयति—ससर्गाभावश्चत्यादि । ससर्गाभावत्वमन्योन्याभावत्व (च) नञ्शक्यतावच्छेदकमित्यर्थ· । ससर्गाभावत्वं ध्वसप्रागभावादौ ससर्गाभाव इति प्रतीतिसाक्षिकोऽखण्डोपाधि । केचित्तु ससर्गाभावत्व ससर्गारोपजन्यप्रतीतिविषयाभावत्वम् । न चाभावबुद्धौ प्रतियोगिसंसर्गारोपस्य हेतुत्वे मानाभावान्नैवमिति वाच्यम् ।

For the end, see under the next number

No 4255. नञ्वादशिरोमणिव्याख्यानम्—नञ्विवेचनम्

NAÑVĀDAŚIROMANIVYĀKHYĀNAM
NAÑVIVĒCANAM

Pages, 16 Lines, 10 on a page

Begins on fol 1*a* of the MS described under No 4005

A commentary on the Nañvādasirōmani of Raghunatha-śirōmani

By Raghudēvanyāyālankāra

The first leaf is wanting. There are 2 pages of the original text also in this manuscript

Same work as the above

See under the previous number for the beginning

End·

न च दुग्धं न दधि इत्यादौ दधिपदोत्तरलुप्तविभक्तेरनुसन्धानं विनापि शाब्दबोधस्यानुभवसिद्धस्यापि लाभो बोध्य ॥

अत्रानुक्तं दुरुक्तं वा यत्किञ्चिज्जल्पित मया ।
तत्सर्वं जगदीशस्य प्रीत्यर्थं स्यादनिन्दितम् ॥

रघुदेवकृतग्रन्थालोकनेन मनीषिणः ।
अध्यापयन्तु सन्तोषैर्नञ्वादमाविवादत ॥

Colophon

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता नञ्वादव्याख्या समा-

यडवेल्लिकुलोद्भूततिम्मनाख्यबुधो मुदा ।
रघुदेवकृतां टीका व्यलिखन्नञ्शिरोमणे ॥

No 4256. नञ्वादार्थप्रदीपः.

NAÑVĀDĀRTHAPRADĪPAH

Pages, 27 Lines, 6 on a page

Begins on fol 7*b* of the MS described under No 3916

Complete

By Bhavānanda

This is another commentary on the Nañvāda of Raghunātha-Śirōmani

Beginning.

ससर्गाभाव इति । शक्यतावच्छेदकभेदेन शक्तिभेदसूचनायोक्ति-भेद· । तथा च ससर्गाभावत्वमन्योन्याभावत्व च नञर्थशक्यतावच्छे-दकमित्यर्थ । न च लाघवात्सर्वसाधारणमभावत्वमेव शक्यतावच्छेदक-मस्तु, तत्तत्समभिव्याहारवशात् समवायावच्छिन्नायास्तादात्म्यावच्छिन्नायाः प्रतियोगितायास्ससर्गतया भानेनैव वैलक्षण्यमिति वाच्यम् ।

End:

तावतापि भूतले न घट इत्यादौ घटपदोत्तरसप्तम्या(:) प्रतियोगित्वादौ लक्षणया भूतले घटप्रतियोगिक ससर्गाभाव इति बोधस्य वारणासम्भवात् । कृतिसम्बन्धादेरिति । न पचतीत्यत्र कृति(ते.), न राज्ञ इत्यत्र सम्बन्धस्य नान्योन्याभावबोधनमित्यर्थ· ॥

श्रीभवानन्दसिद्धान्तवागीशेन विनिर्मित ।
नञ्वादार्थप्रदीपोऽय निहन्तु सुधियां तम· ॥

No 4257. नित्यसुखवादः.

NITYASUKHAVADAH

Pages, 7 Lines, 7 on a page

Begins on fol 57*b* of the MS described under No 3922

This is a discussion as to whether the Supreme Being is characterised by blissfulness

Incomplete.

Beginning·

ईश्वरस्सुखवान् न वेति विप्रतिपत्तिः ।

अत्र प्राञ्च·—

ईश्वरो न सुखवान् सुखसामग्र्यभावादिति । तथाहि—धर्मात्सुखमधर्मादुःखमिति दर्शनात् धर्मत्वेन सुखत्वेनैव लाघवात्कार्यकारणभाव इति धर्माभावादीश्वरे न सुखमिति ।

End:

यथात्रैकत्र विशेषणत्वोपस्थापितस्यापि तादृशस्यापरत्रान्वयो निराबाधः, तथा शब्दमण्यालोकविस्तरे विवेचयिष्याम इत्याहु· । एवञ्च आनन्दं ब्रह्मणो रूपमित्यत्रानन्दश.

No 4258. निपातवादार्थ.

NIPĀTAVĀDĀRTHAH

Pages, 14 Lines, 6 on a page

Begins on fol 105*a* of the MS described under No 4073.

A discussion of the various meanings of indeclinable particles

Complete

Beginning:

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
निपातानां वाचकत्व सम्यगत्र विचार्यते ॥

अत्र निपाताना वाचकत्व द्योतकत्व वेति विप्रतिपत्ति. । द्योतकत्व वैयाकरणा ।

तथाहि—

साक्षात्क्रियते घट इत्यत्र साक्षात्पदस्य प्रत्यक्षार्थकत्वे कृञ्धातोश्च यत्नार्थकत्वेऽन्वयानुपपत्ति· ।

End:

मन्मते तु घटकर्मणो(को)मत्कर्तृकसाक्षात्कार इति कर्तृकर्माख्यातयोरविशेष एवान्वयबोध इति नञो द्योतकतैव ॥

Colophon:

निपातवादार्थः ॥

No 4259. पक्षताक्रोडः.

PAKSATĀKRŌDAH

Pages, 19 Lines, 11 on a page

Begins on fol 20*a* of the MS described under No 4236

By Candranārāyana

A discussion relating to the nature of a proposition

Incomplete

Beginning:

ननु यद्धर्मिकयत्सम्बन्धावच्छिन्नयत्प्रकारकनिश्चयत्वेन यत्सशयं प्रति निवर्तकत्व स संशय तद्धर्मिकतत्सम्बन्धसंसर्गकतत्साध्यकानुमितौ हेतुभूता पक्षता इति। अस्य साध्यतावच्छेदकसम्बन्धावच्छिन्ने साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसशय पक्षतेति—निष्कर्ष: ।

अत्रेयमापत्ति —

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयत्वनिवेशेनैवोक्तानुगमसम्भवे निश्चयपर्यन्तानुधावन व्यर्थम् ।

End:

तथा चोक्तबाधघटकजलवद्भ्रदत्वावच्छिन्नविषयताया अपि सत्प्रतिपक्षज्ञानप्रतिबन्धकतावच्छेदकतया प्रकृतानुमित्यवृत्तिनया तन्निरूपकतावच्छेदकजलवद्भ्रदत्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वस्योक्तबाधत्वादावभावात् । अत प्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिवेश इत्याहु ॥

No 4260. पक्षताक्रोड.

PAKSATĀKRŌDAH

Substance, palm-leaf Size $14\frac{1}{8} \times 1\frac{5}{8}$ inches Pages 28 Lines, 10 on a page Character, Grantha Condition, injured Appearance, old

Begins on fol. 30*a* The other work herein is Śatakōṭi-khaṇḍanamandana 1*a*

Incomplete

Similar to the above

Author unknown.

Beginning:

सत्यपि परामर्शादौ पक्षे साध्यनिर्णयदशाया विनानुमित्सामनुमित्यनुदयात् अनुमितिं प्रति पक्षताया हेतुत्व कल्प्यते . . . अथैवमपि पर्वतो वह्निमानित्येतादृशसिद्धिकाले अधिकविषयिण्या अपि नीलपर्वतो वह्निमान् पर्वतस्सुन्दरवह्निमानित्याकारकानुमितेरनुदयापत्तिः । पर्वतत्वादिपर्याप्तोद्देश्यतावच्छेदकताकत्वस्य वह्नित्वपर्याप्तविधेयताबच्छेदकवस्य च निवेशेऽप्यनिस्तार ।

End.

वह्निमान् पर्वतो घटवानित्याद्यनुमिति प्रति सिद्ध्यादिप्रतिबन्धकतायामपि पर्वतो वह्न्यभाववानित्येतादृशबाधाभावादिनिवेश(शे)न बाधकाले तादृशानुमितिवारणसभवात् । एवमभावस्य तत्तद्व्यक्तित्वेन हेतुतायामेकप्रतिबध्यप्रतिबन्धकभावपरिशेषापत्तिरिति दिक् । अथानुमितिं प्रति साध्यनिर्णयत्वेन प्रतिबन्धकत्वकल्पनापेक्षया

No 4261. पञ्चमविषयताविचार.

PAÑCAMAVISAYATĀVICĀRAH

Substance, palm-leaf Size, 18½ × 1½ inches Pages, 12 Lines, 7 on a page Character, Grantha Condition, good Appearance, new

Begins on fol 35*a* The other works herein are Śatakōti 1*a*, Samānabalavicāra 14*a*, Bādhakrōdapatra 27*a*, Sādhāranavicāra 41*a*, Sāmānyaniruktipatra 51*a*

A critical discussion of Pañcamavisayatā which forms a part of Gadhādhara's discussion of the five limbs of a syllogism

Incomplete

Beginning:

पञ्चमविषयताशे विशेषणविधयानुमितिजनकतावच्छेदकतापर्याप्त्यधिकरणीभूतो यो धर्म. . . . . .

लिङ्गत्वाविषयकत्वं प्रतिज्ञालक्षणे गदाधरभट्टाचार्यैः परिष्कृतम् । अथात्र तादृशधर्मावच्छिन्नविषयत्वावच्छिन्नत्व प्रतिबन्धकताया निविष्ट तादृशधर्मावच्छिन्नविषयतानिष्ठावच्छेदकताकत्व, तादृशधर्मावच्छिन्नाश्रयविषयतानिष्ठावच्छेदकताकत्व वा, उभयमपि न सम्भवति ।

End:

उक्तस्थले अधिकरणविषयतायास्साध्यनिष्ठप्रकारतानिरूपितत्वेऽपि तन्निष्ठधर्मितावच्छेदकत्वाभावादिति वाच्यम्, साध्याभावव्यापकतावच्छेदकहेत्वभाववत्प्रतियोगिहेतुमान्

No 4262. पदार्थतत्त्वनिरूपणम्.

PADĀRTHATATTVANIRŪPANAM

Pages, 17 Lines, 5 on a page

Begins on fol 1*a* of the MS described under No. 4252
By Bhattācāryaśirōmani.
An examination of the nature of the various categories
Complete.

Beginning:

(ओं नमस्सर्वभूतानि विष्टभ्य प)रिवर्तते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अथ पदार्थतत्त्व निरूप्यते — तत्र दिक्कालौ नेश्वरादति(रिच्येते मानाभावात्)तत्तन्निमित्तविशेषसमवधानवशात् ईश्वरादेव तत्तत्कार्यविशेषाणामुपपत्ते. । परेषामे(कैकस्माद्दिगादेरिव)विलक्षणानां प्राच्यादिव्यवहाराणां शब्दनिमित्तकारणत्वेन कृत्स्नस्येश्वरस्यैव शब्दसमवायिका(रणत्वम्) ।

End:

कारणत्वप्रतियोगित्वमेव कार्यत्वमिति चेत् कार्यत्वप्रतियोगित्वमेव कारणत्वमपि किन्न रोचते[2] तस्मात् कारणत्वञ्चोभयभिन्नमेवेति कृतं पल्लवेन ॥

अर्थानां युक्तिसिद्धाना मदुक्तानां प्रयत्नत' ।
सर्वदर्शनसिद्धान्तविरोधो नैव दूषणम् ॥
अर्थाना युक्तिसिद्धान्ताविरोधेनैव पण्डिता ।
विना विचार न त्याज्या तद्विचाराय(विचारयत)यत्नतः ॥
सर्वशास्त्रानु(र्थ)तत्त्वज्ञान् नत्वा नत्वा भवादृशान् ।
इदं प्रोचे मदुक्तानि विचारयत सादरम् ॥
नातिरोषो(रीतिरेषा) न दोषाय सेविता पूर्वपण्डितै ।
यन्निजोक्तिविचाराय याचते विदुषो(ष) परान् ॥

Colophon:

इति श्रीमहोपाध्यायश्रीमद्भट्टाचार्यशिरोमणिविरचित पदार्थतत्त्वनिरूपण समाप्तम् ॥

No 4263 पदार्थतत्त्वनिरूपणम्

PADĀRTHA TATTVANIRŪPANAM

Pages, 11 Lines, 7 on a page

Begins on fol 1*a* of the MS described under No 3918

Complete

Same work as the above

No 4264. पदार्थतत्त्वनिरूपणव्याख्या.

PADĀRTHATATTVANIRŪPANAVYĀKHYĀ

Pages, 113 Lines, 6 on a page

Begins on fol 10*a* of the MS described under No 4252

A commentary on the Padārthatattvanirūpana of Raghunāthaśirōmani by Raghudēvanyāyālankāra

Complete.

Beginning:

नन्दनन्दनपदद्व(द्वद्व)न्द्व निधाय हृदि चिन्तय(न्) ।
तनोति कुत्र(तु)क किञ्चिद्रघुदेवस्समासत ॥

कामहस्तधृतसाखकार्मुक पौष्पमद्भुतमुदीक्ष्य कुप्यत ।
घूर्जटेर्नयनकोणशोणता हन्तु सर्वजगतामुपद्रवम् ॥

पदार्थतत्त्व यदिद शिरोमणिर्निर्णीतवान् जीर्णमतस्य दूषणै ।
तदेव तर्केण विचारयामस्सदर्थकेनेतरखण्डनेन ॥

प्रसङ्गात् पदार्थतत्त्व निर्वक्तु शिष्यावधानाय प्रतिजानीते—अथेत्यादि । नञ्पदादे ससर्गाभावत्वान्योन्याभावत्वादौ शक्यतावच्छेदकत्वव्यवस्थापनानन्तर प्राचीनाभ्युपेतपदार्थाना कस्यचिदनतिरिक्तत्व, कस्यचित्खण्डन, कस्यचिदतिरिक्तत्वं तर्केण व्यवस्थाप्यत इत्यर्थ । तत्रेति । प्राचीनाभिमतपदार्थेषु मध्य इत्यर्थ । दिक्कालावित्यादि । दिक्कालयोरतिरिक्तत्व यत्प्राचीनैस्स्वीकृतम्, तन्न युक्तिसिद्धम् । तयोरतिरिक्तत्वे मानाभावादित्यर्थ. ।

End:

नन्वप्रयोजका एव त्वदर्था इत्यत आह—

युक्तिसिद्धानामिति । मदुक्ताना नान्येनोक्तानां दर्शन शास्त्र भवादृशान् पण्डितान् एषा पूर्वश्लोकोक्ता पूर्वपण्डितैः वाचस्पतिमिश्रादिभि. । परानिति । पण्डितानामि(नि)त्यर्थः ॥

पदार्थखण्डनाक्रात(न्त)पुरुहूतपुरोहितम् ।
शिरोमणिमहं वन्दे शिरोमणिमिवाद्भुतम् ॥

श्रीमद्दीधिति(कार)कल्पितमहाकोलाहलव्याकुले
मार्गे सञ्चरणाय यानि(यन्नि)गदितं सिद्धान्तसिद्धेतरत् ।

दैवात्तेन भवेद्यदीह सहसा प्रौढापराधो मम

क्षन्तव्यः कृतिभिः श्रुतो यदि भवेद्यक्ता(क्षा)नुरूपाद्याव(पो ब)लि ॥

Colophon

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता पदार्थखण्डनव्याख्या समाप्ता ॥

No 4265. पदार्थखण्डनशिरोमणिव्याख्या
PADĀRTHKHANDANAŚIRŌMANIVYĀKHYĀ

Pages 54 Lines, 7 on a page

Begins on fol 7*a* of the MS described under No 3918

A commentary on the Padārthatattvanirūpana of Śirōmani by Jayarāma The change in the name of the original work is worth noticing

Complete

Beginning:

तातस्य तर्कसरसीरुहकाननेषु चूडामणेर्दिनमणेश्चरणौ प्रणम्य ।
श्रीरामभद्रसुकृती कृतिना हिताय लीलावशात्किमपि कौतुकमातनोति ॥

तत्र तेषु पदार्थेषु । दिक्कालाविति । पूर्वस्यां घट इत्यादिप्रतीतिविषयविभुत्वमिह दिक्त्व, कालत्वञ्च इदानी घट इत्यादिप्रतीतिविषयविभुत्वमिह कालत्वम्, अतो न सिद्ध्यसिद्धि(भ्यां) व्याघात , न वा घटादावशतो बाधः । पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायामतिरिक्तदिगादेर्निराकरणानुपपत्तेः ।

End:

अनर्थे तादृशबोधस्य फलस्य प्रामाणिकत्वे तद्बोधाय प्रकारतातिरिक्तसबन्धस्यैव कार्यतावच्छेदकत्वात् अन्यथानुपपत्तेर्दुर्वारत्वादिति परमरहस्यमत्रानुसन्धेयम् ॥

Colophon

इति श्रीन्यायवाचस्पतिभट्टाचार्यजयरामेण विरचिता पदार्थखण्डन-शिरोमणिव्याख्या समाप्ता ॥

No 4266 पदार्थतत्त्वविवेक..

PADĀRTHATATTVAVIVĒKAH

Substance, palm-leaf Size, 17 × 1 inches Pages, 176 Lines, 5 on a page Character, Telugu Condition, injured Appearance, old

Breaks off in Śabda-paricchedā

A work on the categories by a pupil of Laksmanaguru

The subject matter of the work is similar to that of what is described under No 4264

Beginning :

(आलम्बे) जगदालम्ब लम्बोदरपदाम्बुजम् ।
शुप्यन्ति यद्रजस्स्पर्शात्सद्य· प्रत्यूहवार्द्धयः ॥

नत्वा विश्वेश्वर साम्बं गुरु श्रीलक्ष्मणाभिधम् ।
द्रव्यादीनां पदार्थानां विवेक क्रि(यतेऽधुना) ॥

(स्वाभि)मतकर्मारम्भसमये सर्वे शिष्टा मङ्गलमाचरन्ति । तस्य न समाप्तिः फलम्, कृतेऽपि मङ्गले असमाप्ते, अकृतेऽपि मङ्गले समाप्तेश्च ।

* * * *

विभागे स्वतन्त्रेच्छाया नियामकृत्वादिति दिक् ॥

Colophon :

इति प्रत्यक्षपरिच्छेदः समाप्तः ॥

End:

अनादिप्रयोगानुसारिणी लक्षणा निरूढलक्षणा, यथा—नीलपदस्य नीलवति । यत्र, मानान्तरात् रूढ्यर्थसंबन्धिनि तात्पर्यमवधार्यते, तत्र रूढिपूर्विका लक्षणा, यथा—मण्डपपदस्य गृहसम्बन्धिनि पुरुषे.

No 4267. पदार्थमाला.

PADĀRTHAMĀLĀ

Substance, palm-leaf Size, 15½ × 1⅜ inches Pages, 80 Lines, 8 on a page Character, Grantha Condition, injured Appearance, new

Contains Dravyanirūpana complete
Breaks off in Gunanirūpana
By Jayarāma
A work similar to the one described under 4264

Beginning.

स्वीकृतकुपितयशोदाश्रमहरगोदामबन्धनव्यसनम् ।
नलिनीदलसुकुमार नन्दकुमार नमस्याम ॥

श्रीमता जयरामेण युक्तिमौक्तिकगुम्भिता ।
पदार्थमाला विदुषां प्रमोदाय वितन्यते ॥

साधर्म्यवैधर्म्याभ्यां निखिलपदार्थतत्त्वज्ञान नि श्रेयसोपयोगीति पदार्थास्तद्धर्माश्च निरूप्यन्ते—

तत्र पदार्था द्रव्यगुणकर्मसामान्यविशेषसमवायाभावा । अत्र पदार्थमात्रमुद्दिश्य द्रव्याद्यन्यतमत्वेन विधानात् द्रव्याद्यन्यतमत्वेन पदार्थव्यापकत्व लभ्यते ।

End:

